# Vishvanarakritam 1 Shiva Stotram

# વિશ્વાનરકૃતં ૧ શિવસ્તોત્રમ્

## Document Information

Text title : Vishvanarakritam 1 Shiva Stotram

File name : vishvAnarakRRitaM1shivastotram.itx

Category : shiva, skandapurANa, stotra, aShTaka

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | kAshIkhaNDa | pUrvakhaNDa | adhyAya 10/126-133||

Latest update : June 9, 2025

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 9, 2025

*sanskritdocuments.org*

Vishvanarakritam 1 Shiva Stotram

# વિશ્વાનરકૃતં ૧ શિવસ્તોત્રમ્

(વીરેશ્વર લિઙ્ગ)
તમાલોક્ય સ્તુતિં ચક્રે રોમકઞ્ચુકિતો મુદા ।
પ્રોચ્ચરદ્ગદ્ગદાલાપો નમોઽસ્ત્વિતિ પુનઃ પુનઃ ॥

વિશ્વાનર ઉવાચ ।
એકબ્રહ્મૈવાદ્વિતીયં સમસ્તં સત્યં સત્યં નેહ નાનાસ્તિ કિઞ્ચિત્ ।
એકો રુદ્રો ન દ્વિતીયોઽવતસ્થે તસ્માદેકં ત્વાં પ્રપદ્યે મહેશમ્ ॥ ૧॥

એકઃ કર્તા ત્વં હિ સર્વસ્ય શમ્ભો નાનારૂપેષ્વેકરૂપોઽસ્ય રૂપઃ ।
યદ્વત્પ્રત્યપ્સ્વર્ક એકોઽપ્યનેકસ્તસ્માન્નાન્યં ત્વાં વિનેશં પ્રપદ્યે ॥ ૨॥

રજ્જૌ સર્પઃ શુક્તિકાયાં ચ રૂપ્યં નૈરઃ પૂરસ્તન્મૃગાખ્યે મરીચૌ ।
યદ્વત્તદ્વદ્વિષ્વગેષ પ્રપઞ્ચો યસ્મિઞ્જ્ઞાતે તં પ્રપદ્યે મહેશમ્ ॥ ૩॥

તોયે શૈત્યં દાહકત્વં ચ વહ્નૌ
તાપો ભાનૌ શીતભાનૌ પ્રસાદઃ ।
પુષ્પે ગન્ધો દુગ્ધમધ્યેઽપિ સર્પિ-
ર્યત્તચ્છમ્ભો ત્વં તતસ્ત્વાં પ્રપદ્યે ॥ ૪॥

શબ્દં ગૃહ્ણાસ્યશ્રવાસ્ત્વં હિ
જિઘ્રેરઘ્રાણસ્ત્વં વ્યઙ્ઘ્રિરાયાસિ દૂરાત્ ।
વ્યક્ષઃ પશ્યેસ્ત્વં રસજ્ઞોઽપ્યજિહ્વઃ
કસ્ત્વાં સમ્યગ્વેત્ત્યતસ્ત્વાં પ્રપદ્યે ॥ ૫॥

નો વેદસ્ત્વામીશ સાક્ષાદ્ધિ વેદ નો વા વિષ્ણુર્નો વિધાતાઽખિલસ્ય ।
નો યોગીન્દ્રા નેન્દ્રમુખ્યાશ્ચ દેવા ભક્તો વેદ ત્વામતસ્ત્વાં પ્રપદ્યે ॥ ૬॥

નો તે ગોત્રં નેશજન્માપિનાખ્યા નો વા રૂપં નૈવ શીલં ન દેશઃ ।
ઇત્થં ભૂતોઽપીશ્વરસ્ત્વં ત્રિલોક્યાઃ સર્વાન્કામાન્પૂરયેસ્તદ્ભજે ત્વામ્ ॥ ૭॥

ત્વત્તઃ સર્વં ત્વં હિ સર્વં સ્મરારે

ત્વં ગૌરીશસ્ત્વં ચ નગ્નોઽતિશાન્તઃ ।
ત્વં વૈ વૃદ્ધસ્ત્વં યુવા ત્વં ચ
બાલસ્તત્ત્વં યત્કિન્નાસ્યતસ્ત્વાં નતોઽસ્મિ ॥ ૮॥

ઇતિ શ્રીસ્કાદપુરાણે કાશીખણ્ડે પૂર્વાર્દ્ધે દશમાધ્યાયાન્તર્ગતં
વિશ્વાનરકૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । કાશીખણ્ડ । પૂર્વખણ્ડ ૧ । અધ્યાય ૧૦/૧૨૬-૧૩૩ ॥

skandapurANa . kAshIkhaNDa . pUrvakhaNDa 1 . adhyAya 10/126-133..

Proofread by PSA Easwaran

*Vishvanarakritam 1 Shiva Stotram*
pdf was typeset on June 9, 2025

Please send corrections to *sanskrit@cheerful.com*